"अतश्चैतन्यकर्त्तृत्वे भिन्नाधिकरणे युक्तितः सिद्धे तस्मादभ्रान्तिरियमित्यर्थः। लिङ्गं महदादिसूक्ष्मपर्य्यन्तं वक्ष्यति भ्रान्तिबीजं तत्संयोगस्तन्निदानम् अतिरोहितार्थमन्यत्" कौ०। तदेतन्मतमुत्थाप्य मुक्तावल्यां निराकृतं यथा "एतेन प्रकृतिः कर्त्री पुरुषः पुष्करपलाशवन्निर्लेपः किन्तु चेतनः कार्य्यकारणयोरभेदात् कार्य्यनाशे कार्य्यरूपतया नाशः स्यादित्यकारणत्वं तस्य बुद्धिगतचैतन्याभिमानार्थानुपपत्त्या तद्कल्पनम्। बुद्धिश्च प्रकृतेः प्रथमः परिणामः। सैव महत्तत्त्वमन्तःकरणमप्युच्यते। तत्सत्त्वासत्त्वाभ्यां पुरुषस्य संसारापवर्गौ। तस्या एवेन्द्रियप्रणालिकया परिणतिर्ज्ञानरूपा घटादिना सम्बन्धः। पुरुषे कर्त्तृत्वाभिमानो बुद्धौ चैतन्याभिमानश्च भेदाग्रहात्। ममेदं कर्त्तव्यमिति मदंशः पुरुषोपरागो बुद्धेः स्वच्छतया चेतनप्रतिबिम्बादतात्त्विको दर्पणस्येव मुखोपरागः। इदमिति विषयोपराग इन्द्रियप्रणालिकया परिणतिभेदस्तात्त्विको निश्वासाभिहतदर्पणस्येव मलिनिमा। कर्त्तव्यमिति व्यापारावेशः। तेनांशत्रयवती बुद्धिस्तत्परिणामेन ज्ञानेन पुरुषस्यातात्त्विकः सम्बन्धो दर्पणमलिनिम्नेव मुखस्योपलब्धिरुच्यते। ज्ञानादिवत् सुखदुःखेच्छाद्वेषप्रयत्नधर्म्माधर्म्मा अपि बुद्धेरेव कृतिसामानाधिकरण्येन प्रतीतेः। न च बुद्धिश्चेतना परिणामित्वादिति सांख्यमतमपास्तम् कृत्यदृष्टभोगानामिव चैतन्यस्यापि सामानाधिकरण्यप्रतीतेस्तद्भिन्ने मानाभावाच्चेतनोऽहं करोमीति प्रतीतेः। बुद्धेः परिणामित्वाच्चैतन्यांशे भ्रम इति चेत् कृत्यंशे किं नेष्यते। अन्यथा बुद्धेर्नित्यत्वे तत्पूर्व्वमसंसारापत्तिः। अचेतनायाः प्रकृतेः कार्य्यत्वात् बुद्धेरचैतन्यं कार्य्यकारणयोस्तादात्म्यादिति चेन्न असिद्धेः कर्त्तुर्जन्यत्वे मानाभावात् वीतरागजन्मादर्शनादनादित्वम्। अनादेर्नाशासम्भवान्नित्यत्वम्" मुक्ता०। वेदान्तिमते आविद्यिकजीवस्यैवौपाधिकं कर्त्तृत्वं शा०सू० भा० व्यवस्थापितम् यथा।

"कर्त्ता शास्त्रार्थवत्त्वात्"। तद्गुणसारत्वाधिकारेणैवापरोऽपि जीवधर्म्मः प्रपञ्च्यते। कर्त्ता चायं जीवः स्यात् कस्मात् शास्त्रार्थवत्त्वात् एवञ्च यजेत जुहुयात् दद्यादित्येवंविधं विधिशास्त्रमर्थवद्भवति अन्यथा तदनर्थकं स्यात्। तद्धि कर्त्तुः सतः कर्त्तव्यविशेषमुपदिशति न चासति कर्त्तृत्वे तदुपपद्यते। तथेदमपि शास्त्रमेवमर्थवद्भवति "एष हि द्रष्टा श्रोता मन्ता बोद्धा कर्त्ता विज्ञानात्मा पुरुष" इति भा०। "विहारोपदेशात्" सू०। "इतश्च जीवस्य कर्त्तृत्वं यज्जीवप्रक्रियायां सन्ध्ये स्थाने विहारमुपदिशति "स ईयतेऽमृतो यत्रकाममिति" "स्वे शरीरे यथाकामं परिवर्त्तते" इति च भा०। "उपादानात्" सू०। "इतश्चास्य कर्त्तृत्वं यज्जीवप्रक्रियायामेव करणानामुपादानं सङ्कीर्त्तयति। "तदेषां प्राणानां विज्ञानेन विज्ञानमादायेति"। "प्राणान् गृहीत्वेति च" भा०। "व्यपदेशाच्च क्रियायां न चेन्निर्द्देशविपर्य्ययः" सू०। "इतश्च जीवस्य कर्त्तृत्वं यदस्य लौकिकीषु वैदिकीषु च क्रियासु कर्त्तृत्वं व्यपदिश्यते "विज्ञानं यज्ञं तनुते कर्म्माणि तनुतेऽपि चेति"। ननु विज्ञानशब्दो बुद्धौ समधिगतः कथमनेन जीवस्य कर्त्तृत्वं सूच्यतेति नेत्युच्यते जीवस्यैवैष निर्द्देशो न बुद्धेः न चेज्जीवस्य स्यात् निर्द्देशविपर्य्ययः स्यात् विज्ञानेनेत्येवं निरदेक्ष्यत्। तथा ह्यन्यत्र बुद्धिविवक्षायां विज्ञानशब्दस्य करणविभक्तिनिर्द्देशो दृश्यते "तदेषां प्राणानां विज्ञानेन विज्ञानमादायेति"। इह तु "विज्ञानं यज्ञं तनुत" इति कर्त्तृसमानाधिकरण्यनिर्द्देशात् बुद्धिव्यतिरिक्तस्यैवात्मनः कर्त्तृत्वं सूच्यत इत्यदोषः। अत्राह यदि बुद्धिव्यतिरिक्तो जीवः कर्त्ता स्यात् स स्वतन्त्रः सन् प्रियं हितं चैवात्मनो नियमेन सम्पादयेत् न विपरीतं, विपरीतमपि तु सम्पादयन्नुपलभ्यते। न च स्वतन्त्रस्यात्मन ईदृशी प्रवृत्तिरनियमेनोपपद्यते इति अतउत्तरं पठति" भा०। "उपलब्धिवदनियमः" सू०। यथायमात्मोपलब्धिं प्रति स्वतन्त्रोऽप्यनियमेनेष्टमनिष्टञ्च उपलभते एवमनियमेनैवेष्टमनिष्टञ्च सम्पादयिष्यति। उपलब्धावप्यस्वातन्त्र्यमुपलब्धिहेतूपादानोपलम्भादिति चेन्न विषयविकल्पनमात्रप्रयोजनवत्त्वादुपलब्धिहेतूनाम् उपलब्धौ त्वनन्यापेक्षत्वमात्मनः चैतन्ययोगात्। अपि चार्थक्रियायामपि नात्यन्तमात्मनः स्वातन्त्र्यमस्ति देशकालनिमित्तविशेषापेक्षत्वात्। न च सहायापेक्षस्य कर्त्तुः कर्त्तृत्वं निवर्त्तते। भवति ह्येधोदकाद्यपेक्षस्यापि पक्तुः पक्तृत्वम्। सहकारिवैचित्र्याच्चेष्टानिष्टार्थक्रियायामनियमेन प्रवृत्तिरात्मनो न विरुध्यते" भा०। "शक्तिविपर्य्ययात्" सू०। "इतश्च विज्ञानव्यतिरिक्तो जीवः कर्त्ता भवितुमर्हति। यदि पुनर्विज्ञानशब्दवाच्या बुद्धिरेव कर्त्री स्यात्ततः शक्तिविपर्य्ययः स्यात् करणशक्तिर्बुद्धेर्हीयेत कर्त्तृशक्तिश्चापद्येत। सत्याञ्च बुद्धेः कर्त्तृशक्तौ तस्या एवाहंप्रत्ययविषयत्वमभ्युपगन्तव्यम् अहंकारपूर्व्विकाया एव प्रवृत्तेः सर्व्वत्र दर्शनात् अहं गच्छाम्यहं भुञ्जेऽहं